पात्रे णाच्छन्नं क्षौद्रं वलाभुखे॥ पौष्णे तु सितः सम्भूय शयवासुदेवं जले शयं॥ पुष्पधूपोपहारैश्च
यथाविभवमादृतः॥ संकल्प्य जलधेनुं च कुंभं तमभिपूज्य च॥ पूजयेद्दक्षिणे तद्वत्कलशं जलमयं
बुधः॥ एवं संपूज्य गोविंदं जलधेनुं सवत्सकां॥ सितवस्त्र संगो वीतरागो विमत्सरः॥ दद्या
द्विजाय राजेंद्र प्रीत्यर्थं जलशायिनः॥ जलशायी जगद्योनिः प्रीयतां मम केशवः॥ इति चो
च्चार्य भूनाथ विप्राय प्रतिपाद्यतां॥ अपक्कं नाशिनास्तथ्य महोरात्रमतः परं॥ अनेन वि
धिना दत्वा जलधेनुं नराधिप॥ सर्वान्कामानवाप्नोति ये दैवाये च मानुषाः॥ शारीरारोग्य
मा व्याधाप्रशमः सर्वकामिकः॥ स्वर्गो भवति स्नातायां जलधेन्वां न संशयः॥ इति॥ अत्र जल
कुंभ्योः तयोः परिमाणं उच्यते॥ स्ववर्णाद्यन्वितं स्वं च सुवर्णं शृंगाकृतिरजतं खुरास्तिः॥
जलपात्राणि ताम्रमयानि॥ दधिपात्रं कांस्यपात्रं॥ धान्यानि पार्श्वद्वये॥ कुष्टादीनि
घ्राणदेशे॥ प्रियंगुपत्रं श्रवणे॥ यज्ञोपवीतं शिरसि॥ वस्त्रश्च चतुर्थांशेन॥ दक्षिणा च सु
वर्णमारभ्य यथाशक्ति॥ एतच्च तत्तद्धेनुवद्विरोधात्तत्सामान्यादितरेषु तथात्वमिति न्यायेन शेयं
इति श्रीमीमांसक भट्टदिनकर कृते दिनकरोद्योते जीवच्छ्राद्धप्रयोगः॥ और्ध्वदेहिकानंतरं धर्म॥
नित्यं नैमोत्तिकं चापि कुर्याद्दासयजनेन॥ बोधयापमस्तस्य धर्मशास्त्रे विधीयते॥ सूतकं तस्य संदेह
नात्रेण शुध्यति॥ १॥

हे आगस गृहद्वारो पान्ते पात्रद्वये क्षीरं जलं च क्षिप्त्वा ॥ जीवा त्र स्नाहि इति जलं
निधिष दुग्धं पिब इति दुग्धं निवेदयेत् ॥ तस्मिन् दिने आशौचं ॥ ततो रात्रौ दक्षि
णाग्र दर्भेषु उदङ्मुखः स्वपेत् ॥ प्रातः रमावास्यायां स्नात्वा ॥ जीवच्छ्राद्धं करिष्ये ॥
इति संकल्प्य ॥ सपिण्डकं स्वस्यैकोद्दिष्टं श्राद्धं कुर्यात् ॥ तत्र पिण्ड समीपे घृतान्नं मास
दृष्टिभिः कर्म त्रयं पूरयेत् ॥ ततो मासि का निषोडश कृत्वा ॥ सपिण्डीकरणं प्रत्य
क्षमेतवत् कुर्यात् ॥ सर्वत्र जीवच्छ्राद्धे प्रेत शब्दो नास्ति ॥ अत्रोक्त जलधेनु विधि
र्विष्णुधर्मोत्तरे ॥ जलधेनुं प्रवक्ष्यामि भीमापतिर तथा यया ॥ देवदेवो हृषीकेशः सर्वे
शः सर्वभावनः ॥ जलकुंभं नरव्याघ्र सुवर्ण रजतान्वितं ॥ रत्नगर्भं मधोवैत्तिक ग्रा
म्यैर्धान्यैः समन्वितं ॥ सितवस्त्रयुगच्छन्नं दूर्वापल्लव शोभितं ॥ कुष्ठं मांसी मुरो
शीर तिलगंधामलैर्युतं ॥ प्रियंगुपत्र सहितं सितवस्त्रोपवीतिनं ॥ सछत्रं सउपा
नत्कं दर्भ विष्टर संस्थितं ॥ चतुर्भिः संवृतं भूप तिलपात्रैश्चतुर्दिशं ॥ स्थगितं दधि

मत्स्यैकं निवेदयेत्॥ ततो दीपमरुतिदाहार्थमग्निं ॐ ग्नः आदरवह्निलभायै भूम्यै नमः॥
इति पठन् क्षीरयुक्तं जलकुंभं क्षेत्रे निर्वापयेत्॥ ततस्स्नात्वा नाभिमात्रजले स्थित्वा
यमादिभ्यः ससतिलजलांजलीन् दद्यात्॥ मंत्रा यथाक्रमः॥ ॐ यमाय स्वधा नमः॥
2 ॐ धर्मराजाय स्वधा नमः॥ मृत्यवे अंतकाय॥ वैवस्वताय कालाय॥ सर्वप्राणिहरा
य इति ततः ॐ नमो रुद्राय श्मशानपतये इति नम इति क्षीरोदकपूर्णकुंभं भुवि वि
2 किरेत्॥ ततो दक्षिणाग्रदर्भेषु स्वधा अमुकगोत्रामुकप्रेत तिलोदकं तुभ्यमस्त्विति
तिलोदकं दद्यात्॥ पुरुषे तु स्वधास्थाने नमः ततः पूर्वकृतचरुभ्यां पंच पंच पिंडा
न् प्रत्येकं मिलित्वा दश पिंडान् पितृपितामहादिभ्यो दत्त्वा॥ अर्घ्यगंधपुष्पधूपदीप[illegible]कीन् व
दत्वा प्रत्येकं सर्वेषामक्षय्योस्त्विति ब्रूयात्॥ ततो विष्णुं सौम्यमुखं स्मरेत्॥
पिंडानां उष्मापनिरन्ते एकैकं पिंडं जलपूर्णकुंभे निधाय॥ नाभिमात्रज
लं प्रविश्य एकैकं जलमध्ये क्षिपेत्॥ ततः एकैकं जलपूर्णकुंभमेकैकं चतिल
जलांजलिमिश्रं पंचपंचशो यावत् कुंभान् जलांजलीन् दद्यात्॥ ततस्स्नात्वा गृ

श्रीगणेशाय नमः ॥ अथ पितामहनारायणभट्टकृतप्रयोगः ॥ पुण्यदेशकालधनश्र-
द्धाप्राप्तौ सत्यां सन्यस्यान्यस्य वा जीवच्छ्राद्धं कुर्यात् ॥ तच्च पुत्राद्यौर्ध्वदेहिककर्तरि
सत्यपि कार्यमित्यपि केचित् ॥ अन्ये तु तदभाव एवेति वदंति ॥ यथाशक्ति सर्वप्रा-
यश्चित्तं कृत्वा ऋणधेनुपापधेनुतिलपात्रघृतपात्रदानवैतरणीधेनुदानानि शक्त्या
कृत्वा कुर्यात् ॥ कृच्छ्रद्वादशं कृत्वोपवासः त्रयोदश्यां कृतनित्यक्रियः देशका-
लौ संकीर्त्य और्ध्वदेहिकफलसिद्धये जीवच्छ्राद्धं करिष्ये ॥ इति संकल्प्य
शालग्रामे मूर्तौ जले दौ वा भोक्तारं सर्वेश्वरं विष्णुं शक्त्या षोडशोपचारैः
प्रपूज्य तदग्रे स्थितः जलधेनुः सोपस्करां प्रपूज्य सदक्षिणां सतिलां
पितृभ्यो निवेदयेत् ॥ तत्र सोमाय पितृमते स्वधा नम इदं कृतमस्तु नि-
वेदयेत् ॥ अग्नये कव्यवाहनाय स्वधा नम इदं दक्षिणास्तु ॥ यमायांगि-

रसे स्वधा नम इदं मध्यमस्तु ॥ ततो द्वौ देवपित्रे त्र्यग्नेः पंचाविशान् चरु

३

प्रक्षालनादि पूर्ववत् पूर्वोद० मुखानुपवेश्य आसनावाहनादिनाविश्वेदेवान् अर्घ्य
वस्त्रसंपूज्य ॥ वसुभ्यः स्वाहं विप्रभोजयामि रुद्र भ्य[illegible] स्वाहं विप्रभोजयामि सू
र्यभ्य स्वाहं विप्रभोजयामि ॥ इति प्रत्येकं क्रमेणोक्तासनावाहनादिना ता
न पिअर्घ्य वस्त्र पूज्य ॥ सर्वान् श्राद्धविधिना भोजयित्वा ॥ वस्त्रादिभ्यस्त्रीन् पिंड
न्दत्वोत्तरस्थं सोमोद्देश्यकं सोपस्करा न्नकंधनं वसु स्थानीय ब्राह्मणा

वस्तु यदद्यात् ॥ दक्षिणस्थामोद्देश्यकं रुद्र स्थानीय ब्राह्मणाय दद्यात् ॥ मध्य
स्थं यमोद्देश्यकं सूर्य स्थानीय ब्राह्मणाय दद्यात् ॥ विश्वेदेव ब्राह्मणाभ्यां
दक्षिणां निरूपूरितकांस्यपात्रं देयं ॥ स्वस्वोदकाक्षेप्य जलादि दत्वा ॥ वि
सर्जयेत् ॥ ओं नमो नारायणायेत्यष्टाक्षरं विष्णुं स्मरेत् ॥ ततः श्राद्धशेषं सम
प्यं ॥ स्वयंपारणां कृत्वा रात्रौ कामकुलेशानविशेषणकं नारायणं स्मरेत् ॥
यथाशक्ति जागरणं कुर्यात् प्रातः स्नानादि कृत्वा ॥ यथाशक्त्यैयथा प्रा

स्तां सरिद्वारां गच्छेत् तत्रपूर्वेण ग्रामद्वारेण विप्रो गच्छेत्।। गमनकाले यथानू
वस्था णिलोहस्वं ऊ नि।। जितं ते पुंडरीकाक्ष जितं ते विश्वभावन।। नमस्ते स्तु
हृषीकेश नमस्ते पुरुषर्षभ।। इति पठं न्नूविकिरं न्नगच्छेत्।। नदीतीरे दक्षिणाभि
मुखं स्नात्वं लौकिकं गावह्निं स्वयं ज्वालयेत्। ततश्चिस्य थैगर्तं खनन भूमिप्रार्य
५ नादिप्रसक्षमरणात्। सर्वकार्यं जीवश्राध्ये सर्वत्र प्रेतशब्दो न योज्यः स्वशा
खोक्तं पूर्णाहुत्यंतं होमं कृत्वा प्रधानहोमस्थाने निरग्निभूम्ये यमाय रुद्राय
स्वाहांतसंस्कृताज्येनाहुतित्रयं कुर्यात् पंचाशत्कुशैः कृतां ब्रह्मलोकगमनहेतुमात्म
६ प्रकृतिमंत्येन अक्ष्यौम ग्निभमिस्यादिना स्वमंत्रेण दाहयेत्।। ततो वालास्तदूर्ध्वं यदि
शवदाहवत् कुर्यात्।। ततो मुद्र मिश्रांजि रुमिश्रतंदुलं चरुं स्वयं अन्यस्मिन् द
क्तो स्थाली के पाचित्वा विधिना श्रपयेत्। ततदग्निसमीपे कर्षुत्रयं कृत्वा प्रत्येकं
मधुक्षीरघृतोदकैः पूरयेत्। यथा तेषु तेषु मुद्र पूरिताः त्रीणि शरावाणि ॐ रथि
व्येनमस्तुभ्यं।। ॐ यमाय नमस्तुभ्यं।। ॐ रुद्राय स्मशानपतये नमस्तुभ्यमिति